National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 51-53
© 2025 NJHSR
www.sanskritarticle.com

**Eslavath Saritha**
Research Scholar,
Department of Sahitya,
National Sanskrit University,
Tirupati

**Correspondence:**
**Eslavath Saritha**
Research Scholar,
Department of Sahitya,
National Sanskrit University,
Tirupati

# कविकर्णरसायनकाव्ये रीतयः गुणाश्च।

**Eslavath Saritha**

**रीतिलक्षणं भेदाः च**

रतिशब्दः प्रथमं आलङ्कारिकेषु “अलङ्कार सूत्रवृत्तिः” कृत वामनेन प्रयुक्तः। काव्यावङ्कारः इति नाम्ना अलङ्कारग्रन्थं रचयित्वा। स्वयं तद्व्याख्यामपि रचयामास। प्रथमतया सूत्रात्मकः अलङ्कारग्रन्थः वामनेनैव निबद्धः। अधिकरण नाम्ना प्रधान विभागान् कृत्वा प्रत्यधिकरणं अध्यायविभागोपि वामनेन कृतः। ग्रन्ये पञ्चाधिकरणानि वर्तन्ते एकैकस्मिन् अधिकरणे द्वित्राः। अध्यायाः वर्तन्ते। पञ्चसु अधिकरणेषु द्वादशाध्यायाः, 319 सूत्राणि च वर्तन्ते।
व्याख्यापि वामनेनैव निर्मिता ग्रन्थादौ च प्रतिज्ञा एवं दृश्यते।

**प्रणम्य परमं ज्योतिः वामनेन कविप्रिय।**
**काव्यालङ्कारसूत्राणां स्वेषां वृत्तिः विधीयते॥**

प्रथमाध्याये “रीतिरात्मा काव्यस्य” इति काव्यात्मानं रीतिं वामनः एव निरूपितवान्। ततः प्राचीनः अर्वाचीनो वा रीतिं काव्यात्मानं नोदाजहार। वामनस्य कालः **AD 900** इत्यालङ्कारिकारैः निश्चितः। वामनः दशशब्दगुणान् दशार्थगुणान् च निरूप्य गुणानां संघटनया एव रीतिः भवति इति सिद्धान्तितवान्।**यथा-**

**1. रीतिरात्माकाव्यस्य**

**2. विशिष्टा पदरचनारीतिः**

**3. विशेषो गुणात्मा**

एवं प्रथमाधिकरणे रीतिलक्षणमुक्त्वा तिस्र, रीतीः अपि लक्षितवान्। तृतीयाधिकरणे गुणानां लक्षणं निरूपितवान्। प्रथमतः गुणस्वरूपं अनन्तरं च रीतिस्वरूपं स्पष्टार्थं निरूप्यते।

काव्यशोभायाः कर्तारो धर्माः गुणाः इति गुणसामान्थ लक्षणमुक्त्वा तद्भेदान् विंशतिं निरूपितवान्।

**शब्दगुणाः**

**“ओजः प्रसाद श्लेष समता समाधि माधुर्य।**
**सौकुमार्योदारता अर्थव्यक्तिकान्तयः बन्धगुणाः”॥**

**बन्धः पदरचना। तेषां लक्षणं तु-**

1. ओजः - गाढबन्धत्वमोजः (5)
2. प्रसादः - बन्धस्य शैथिल्यं प्रसादः (6)

ओजः प्रसादयोः मिश्रणेन गुणातिशयो भवतीति वामनः एव निरूपितवान्। गुणः संप्लवादिति (7)

3.श्लेषः - मसृणत्वं श्लेषः (11) मसृणत्वं नाम तत् यस्मिन् सति बद्धानि अपि पदानि एकवत् भासन्ते।
4. समता - मार्गाभेदः समता(12)
5. समाधिः – आरोहावरोहयोः क्रमः समाधिः (13)
6. माधुर्यम् – पृथक्पदत्वं माधुर्यम् (17)
7. सौकुमार्य – अपारुष्य शरीरं सौकुमार्यम् (18)
8. उदारता – विकटत्वमुदारता (19) पदानां नृत्यप्रायत्वं इत्यर्थः

9. अर्थव्यक्तिः – सपदि अन्वयबोधकानां शब्दानां प्रयोगः अर्थव्यक्तिः (20)

10. कान्तिः – औज्वल्य कान्तिः (21)

एवं शब्दगुणानां लक्षणमुक्त्वा त एव अर्थगुणाः इति लक्षणं पृथक् निरूपितवान्।

**अर्थगुणाः**

1. ओजः - अर्थस्य प्रौढिः ओजः (2)
2. प्रसादः - अर्थवैमल्यं प्रसादः (3)
3. श्लेषः - घटना श्लेषः (4)
4. समता - अवैषम्यं समता (5)
5. माधुर्यम् - उक्तिवैचित्र्यम् माधुर्यम् (10)
6. सौकुमार्यम् – अपारुष्य शरीरं सौकुमार्यम् (11)
7. उदारता - अग्राम्यत्वमुदारता (12)
8. अर्थव्यक्तिः – वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः (13)
9. कान्तिः - दीप्तरसत्वं कान्तिः (14)
10. समाधिः – अर्थदृष्टिः समाधिः (15)

एवं विंशति गुणानां लक्षणमुक्त्वा कस्यां रीतौ के वा गुणाः भवन्तीति प्रथमाधिकरणे एव परिगणितवान्।

**समग्रगुणोपेता वैदर्भी।**

**माधुर्यसौकुमार्योपपन्ना पाञ्चाली।**
**ओजः कान्तिमती गौडीया।** इति॥

आनन्दवर्धनादिभिः ये गुणाः माधुर्यादयः निरूपिताः तैः त्रिभिरेव तिस्रः रीतयोपि गृहिताः भवन्ति। **यथा-** माधुर्येण – वैदर्भि रीतिः, प्रसादेन – पाञ्चाली रीतिः, ओजसा – गौडीया रीतिः इति।

**वृत्तयः ->** आनन्दवर्धन अनन्तरवर्तिनः आचार्याः एतावेव रीतीः वृत्तिनाम्ना गृहीतवन्तः। यथा विद्यानाथः, आरभटी, कैशकी, सात्वती, भारती इति। ताः अपि वृत्तयः रीतिरूपाः रीतयो वा वृत्तिरूपाः इति लक्षणे तुल्यतैव।

आरभटी – गौडीया रीतिः, कैशकी – वैदर्भी रीतिः सात्वती, भारती = पाञ्चाली रीतिः इति स्पष्टप्रतिपत्तये

**अत्यर्थसुकुमारार्थसंदर्भा कैशिकी मता।**
**अत्युद्धतार्थसंदर्भा वृत्तिरारभटी स्मृता॥**
**ईषन्मृद्वर्थसंदर्भा भारती वृत्तिरिष्यते।**
**ईषत्प्रौढार्थसंदर्भा सात्वति वृत्तिरिष्यते॥**

**तत्र**

**अत्यन्तसोकुमारौ द्वौ श्रृङ्गारकरुणौ मतौ।**
**अत्यद्धतरसौ रौद्रबीभत्सौ परिकीर्त्तितौ॥**
**हास्यशान्ताद्भुताः किञ्चित्सुकुमाराः प्रकीर्त्तिताः।**
**ईषत्प्रौढौ समाख्यातौ रसौ वीरभयानकौ॥**

यत्र श्रृङ्गारकरुणावतिकोमलेनसंदर्भेण वर्ण्येते तत्र कैशिकी। यत्र रौद्रबीभत्सावति प्रौढेन संदर्भेण प्रतिपाद्येते तत्रारभटी। यत्र नातिसुकुमारा हास्य शान्त अद्भुता नातिसुकुमारेण संदर्भेण संग्रन्थन्ते तत्र भारती। यत्र नाति प्रौढौ वीरभयानकौ नाति प्रौढेन संदर्भेण निर्वाह्येते तत्र सात्त्वती।

**गुणस्वरूपम्**

काव्ये गुणाः अलङ्काराश्च काव्यशोभाकारिणः इति प्राचीनैः आलंकारिकैः अङ्गीकृतम्। गुणालङ्कारयोः भेदः अपि आलङ्कारिकैः विस्तरेण दर्शितः। आलङ्कारिकेषु प्रायः दण्ड्याचार्यः प्राचीनः इति गण्यते। सः अलङ्काराणामेव लक्षणं स्वरूपं च उक्तवान्। गुणाः शौर्यादिगुणाः इव आत्तरशोभा हेतवः अलङ्कारास्तु कटयादयः इव बाह्यशोभा हेतवः इति प्रायशः सर्वालङ्कारिकाणां मतं प्रतिभाति।

“काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते“दण्डी अलङ्कार निर्वचनमेव उक्तवान्।

भामहस्तु “रूपकादिमलङ्कारं बाह्यमाचक्षते परे” वामनस्तु “काव्यशोभायाः कर्तारो धर्माः गुणाः तदतिशय हेतवस्तु अलङ्काराः” इति गुणालङ्कारयोः भेदमपि उक्तवान् दण्डिप्रभृतयः दशगुणान् ऊचुः।

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता।**
**अर्थव्यक्तिरुदारत्वं ओजः कान्ति समाधयः॥**इति।

वामनस्तु एभिरेव नामभिः दशशब्दगुणान् दशार्थगुणान् च उक्तवान्। एवं गुणसंख्या विषये बहवो मतभेदाः प्राचीनानां वर्तन्ते। आनन्दवर्धनः ध्वन्यालोके द्वितीयोद्योते गुणान् रसमात्र धर्मान् उक्त्वा त्रीनेव गुणान् निरूपितवान्। प्राचीनोक्तमेव गुणलक्षणं आनन्दवर्ध-नेनापि अङ्गीकृतम्।

गुणालङ्कार भेदोऽपि तैः उक्तः एव अङ्गीकृतः। मम्मटाचार्य तु आनन्दवर्धनोक्तिं अनुसृत्य विंशति गुणेषु केचित् गुणत्रये अन्तर्भवन्ति केचित् दोषत्यागमात्र फलाः भवन्तिः अन्ये दोषत्वमपि भजन्तीति विंशतित्वं निराकृत्य त्रयः एव गुणा इति सिद्धान्तितवान्।

**केचित् अन्तर्भवन्ति एषु दोषत्यागात्परेस्थिताः।**
**अन्ये भजन्ति दोषत्वं कुत्रचित् न ततो दश॥**

अपि च गुणान् रसस्यैव पोषकान् आनन्दवर्धनः इव अङ्गीकृतवान्।

**ये रसस्याङ्गीनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षा हेतवः ते स्युः अचल स्थितयो गुणाः॥**

माधुर्यादीनां लक्षणं तत्तद् रसानुकूलत्वमपि आनन्दवर्धनेन दर्शितम्।

**1). माधुर्यम्**

वर्गप्रथम तृतीयाक्षर बाहुल्यं पञ्चमाक्षराणां च प्रयोगः समासाभावः अदीर्धसमासो वा यत्र भवति तद् माधुर्यानुकूलः बन्धः-

**मर्ध्नि वर्गान्त्यगाः स्पर्शाः अटवर्गोरणौलघू।**
**अवृत्तिः मध्यवृत्तिः वा माधुर्येघटना तथा॥**

माधुर्यगुणः श्रृङ्गारे विशेषतः विप्रलम्भश्रृङ्गारे ततः करुणे ततोऽपि शान्तरसे शोभावहति।

**श्रृङ्गार एव मधुरः प्रह्लादना रसः।**
**तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति॥**

मम्मटस्तु आह्लादकत्वं माधुर्यं श्रृङ्गारे दृतिकारणम् इत्युक्त्वा

**“करुणे विप्रलम्भे तत् शान्ते चातिशयान्वितम्”**

**2). ओजोगुणः**

**योग आद्य तृतीयाभ्यां अन्त्ययोः रेणतुल्ययोः।**
**ताभिः शशौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि॥**

वर्गद्वितीयतृतीयतृतीयचतुर्थाक्षराणां प्रयोगः संयोगबाहुल्यं दीर्घ-समास इति ओजसः अनुकूलः बन्धः। रौद्रवीर बीभत्स भयानकरसेषु अयमनुकूलः।

**रौद्रादयोरसा दीप्त्याः लक्ष्यन्ते काव्यवर्तिनः।**
**तद् व्यक्तिहेतू शब्दार्थावाश्रित्यौजो व्यवास्थितम्॥**

**3). प्रसादोगुणः –**

झटिति प्रतीयमानार्थानां शब्दानां प्रयोगः प्रसादस्य मुख्यं **लक्षणम् –**

**श्रुतिमात्रेणशब्दात् येनार्थ प्रत्ययो भवेत्।**
**साधारणः समग्रानां स प्रसादो गुणो मतः॥**
**समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति।**
**स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः॥**

(ध्वन्यालोकः- 2/10 कारिका)

एवं बहुधा कृतेषु अपि नियमेषु कवयः स्वेच्छानुवर्तिन पर्थष्टं गुणानां परिवृत्ति चक्रुः अत एव परिवृत्तिमपि अङ्गीकृतवान्।

**वक्तृवाच्य प्रबन्धानां औचित्येन क्वचित् क्वचित्।**
**रचना वृत्तिधर्माणामन्यथात्वमपीष्यते॥**
**एवमेतेषां गुणानां रसानुकूलं लक्षणं प्राचीनैः उक्तमेव।**

एवं गुणानां वृत्तीनां रीतीनां च लक्षणं प्राचीनाभिमतं दर्शितम्। रुचिभेदेन वृत्तिरीत्यादि पृथक् व्यवहारेपि प्रायशः गुणत्रये वृत्तिरीतीनां अन्तर्भावो भवति। **यथा -** माधुर्यस्य गुणस्य यदुदाहरणं तदेव वैदर्भी रीत्याः, कैशिकी वृत्तेश्च उदाहरणं भवति। यथा ओजसः गुणस्योदाहरणं तदेव आरभटी वृत्तेः, गोडीया रीतेश्च उदाहरणं भवितुमर्हति। इतराणि उदाहरणानि प्रसादगुणस्य पाञ्चाली रीतेः, सात्वती वृत्तेश्च उदाहरणं भवति इति स्पष्टप्रतिपत्तये एकैकमुदाहरणं दर्शितम्।

**1. माधुर्यगुणोदाहरणम्**

**बिम्बश्चोष्ठस्स्मितमपि सुमंदर्पणश्चारुवक्त्रं**
**तुङ्गोरोजौ कनककलशौसिञ्जि तं साधुनादः।**
**मत्स्यद्वन्द्वं नयनयुगलं चामिया ताङ्गनानां**
**भद्राङ्गंतत् स्फुटतरमभूद्भूपतेस्सर्वमेतत्॥**

अत्र अनुस्वार अनुनसिकवतां शब्दानां प्रयोग बाहुल्यात् माधुर्यं परिपुष्टं, एवं दीर्घसमासाः अपि न दृष्टाः इति माधुर्यगुणस्योदाहरणम्। स्त्रीणां वर्णनत्वात् शृङ्गाररसात्मकं च। इयमेवोदाहरणं वैदर्भी रीत्याः कैशिकी वृत्तेश्च उदाहरणं भवितुमर्हति।

**2. प्रसादगुणोदाहरणम्**

**चेतो विभेत्तुमनलं यमिनामसावि-**
**त्याम्रप्रवालविशिखस्य मनोभवेन।**
**अग्रे निबद्धसित कैतकवर्हगर्वं**
**कान्ताकराग्रनखरः सुतरां जहार॥**

अत्र मध्यमसमासाः, द्वित्वाक्षराणां विरलतया प्रयोगः महाप्राणानामल्पता च दृष्टा इति प्रसादगुणस्येदमुदाहरणम्। शृङ्गार-रसवर्णनेपि प्रसादगुणः युक्ततरो भवति। इदमेव पाञ्चाली वृत्तेः सात्वती रीत्याश्च उदाहरणं भवितुमर्हति।

**3. ओजो गुणोदाहरणम्**

**स्वर्भैरीभूरिरावस्फुटघननिनदोद्यज्जटाद्योतविद्यु-**
**द्धाडभ्राभ्रात्पतन्त्यां पतदुडुसलिलग्रावयुक्पुष्पवृष्टौ।**
**भ्राम्यद्दन्तित्वगश्चत्पटभुजपटलीपक्षकः पादघात-**
**क्षिप्तव्यालेन्द्रदर्पः प्रभुरवतु नटन्वस्सदा नीलकण्ठः॥**

अत्र ताण्डवाडम्बर वर्णनात् वीरोरसः महाप्राण प्रयोगबाहुल्यं सुदीर्घाः समासाः इति ओजोगुणोदाहरणम् इदमेव आरभटी वृत्तेः, गौडीया रीतेश्च उदाहरणम्।

**निष्कर्षः –**

रतिशब्दः प्रथमं आलङ्कारिकेषु “अलङ्कार सूत्रवृत्तिः” कृत वामनेन प्रयुक्तः। काव्यावङ्कारः इति नाम्ना अलङ्कारग्रन्थं रचयित्वा। स्वयं तद्व्याख्यामपि रचयामास। प्रथमतया सूत्रात्मकः अलङ्कारग्रन्थः वामनेनैव निबद्धः। अधिकरण नाम्ना प्रधान विभागान् कृत्वा प्रत्यधिकरणं अध्यायविभागोपि वामनेन कृतः। ग्रन्ये पञ्चाधिकरणानि वर्तन्ते एकैकस्मिन् अधिकरणे द्वित्राः। अध्यायाः वर्तन्ते।पञ्चसु अधिकरणेषु द्वादशाध्यायाः, 319 सूत्राणि च वर्तन्ते।

व्याख्यापि वामनेनैव निर्मिता ग्रन्थादौ च प्रतिज्ञा एवं दृश्यते।

**प्रणम्य परमं ज्योतिः वामनेन कविप्रिय।**
**काव्यालङ्कारसूत्राणां स्वेषां वृत्तिः विधीयते॥**

गुणानां वृत्तीनां रीतीनां च लक्षणं प्राचीनाभिमतं दर्शितम्। रुचिभेदेन वृत्तिरीत्यादि पृथक् व्यवहारेपि प्रायशः गुणत्रये वृत्तिरीतीनां अन्तर्भावो भवति। **यथा -** माधुर्यस्य गुणस्य यदुदाहरणं तदेव वैदर्भी रीत्याः, कैशिकी वृत्तेश्च उदाहरणं भवति। यथा ओजसः गुणस्योदाहरणं तदेव आरभटी वृत्तेः, गोडीया रीतेश्च उदाहरणं भवितुमर्हति। इतराणि उदाहरणानि प्रसादगुणस्य पाञ्चाली रीतेः, सात्वती वृत्तेश्च उदाहरणं भवति इति स्पष्टप्रतिपत्तये एकैकमुदाहरणं दर्शितम्।

**सहायकग्रन्थसूची-**


1. **काव्यालङ्कारसूत्रवृत्तिः -** चौखाम्बा संस्कृत संस्थान् – वारणासी – 1973
2. **काव्यादर्शः –** आन्ध्रप्रदेश साहित्य अकाडमी – हैदराबाद् – 1980
3. **काव्यप्रकाशः –** सुरभारती समितिः – हैदराबाद् – 1990
4. **ध्वन्यालोकः –** मोती लाल् बनारसी दास् – दिल्ली -1958
5. **कविकर्णरसायनम् –** प्राच्यविद्यासंशोधनालयः मैसूरुविश्व-विद्यालयः - मैसूरु – 1975